# SA-III/1/22SAS3CCTC1/23

**तृतीयसत्रार्द्धः**

**प्रथमपत्रम्**

**संस्कृतशिक्षायां नवीनप्रवृत्तयः**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

## खण्डः – क

**केचन पञ्च प्रश्ना एव समाधेयाः।** **5 (प्रश्नः) ×5 (अङ्कः)=25**

1. संस्कृतसम्भाषणकौशलस्य अभिवृद्धये शिबिरपद्धतेः वैशिष्ट्यं निरूपयत।
2. संस्कृतशिक्षणे मौखिकोपागमस्य सम्प्रत्ययं स्पष्टीकुरुत।
3. संस्कृतशिक्षाप्रचारे केन्द्रीयसंस्कृतविश्वविद्यालयस्य योगदानं वर्णनीयम्।
4. संस्कृतशिक्षणे सङ्गणकोपयोगस्य सम्भावनां लिखत।
5. भाषाप्रदर्शिनी कथं किमर्थं च आयोजनीया? वर्णयत।
6. संस्कृतप्रचारे कस्याश्चित् शासकीयेतरसंस्थायाः योगदानं समीक्षणीयम्।
7. कस्यचिदेकस्य पाठसमालोचनप्रविधेः वर्णनं कुरुत।

## खण्डः – ख

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) ×10 (अङ्कः)=20**

8. शिक्षकः संस्कृतशिक्षणे दृश्य–श्रव्योपकरणानां प्रयोगं कथं कर्तुं शक्नोति? वर्णनीयम्।
9. सम्प्रेषणात्मकोपागमः संरचनात्मकोपागमश्च वर्णनीयौ।
10. संस्कृतक्षेत्रे मुद्रितमाध्यमानां विषये लघुनिबन्धः लेखनीयः।

## खण्डः – ग

**एकः प्रश्न एव समाधेयः।** **1 (प्रश्नः) ×15 (अङ्कः)=15**

11. संस्कृतशिक्षणे अभिरुच्युत्पादनोद्यमानां वर्णनं कुरुत।
12. संस्कृते विविधानाम् अनुसन्धानक्षेत्राणां वर्णनं करणीयम्।

# SA-III/2/22SAS3CCTC2/23

## तृतीयसत्रार्द्धः

## द्वितीयपत्रम्

## शैक्षिकानुसन्धानम् आनुमानिकसाङ्ख्यिकी च

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन पञ्च प्रश्ना एव समाधेयाः।** **5 (प्रश्नः) ×5 (अङ्कः)=25**

1. बुद्धिपरीक्षणं नाम किम्?
2. "व्यक्तित्वाविष्कारिका अभियोग्यता" इत्यस्य कोऽभिप्रायः वर्तते?
3. अन्तर्वृत्तिपरीक्षणं विवेचयत।
4. न्यादर्शप्रक्रियां प्रतिपादयत।
5. उपकरणप्रशासनं प्रदत्तानामङ्कनञ्च विशदीकुरुत।
6. टी-परीक्षणं किमर्थं क्रियते? तस्य सूत्रं विलिख्य सङ्केतान् स्पष्टयत।
7. प्रदत्तानां गुणात्मक-सङ्ख्यात्मकविश्लेषणं कथं भवति?

### खण्डः – ख

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) ×10 (अङ्कः)=20**

8. मुख्यगौणस्रोतेभ्यः प्रदत्तसङ्कलनं कथं क्रियते?
9. यादृच्छिकनिर्यादृच्छिकन्यादर्शयोः विश्लेषणं क्रियताम्।
10. सार्थकतापरीक्षण-काई-वर्गपरीक्षणयोश्च विस्तृतविवेचनं कुरुत।

### खण्डः – ग

**एकः प्रश्न एव समाधेयः।** **1 (प्रश्नः) ×15 (अङ्कः)=15**

11. अनुसन्धानोपकरणानां प्रविधीनाञ्च स्वरूपं विविच्यताम्।
12. शोधप्रतिवेदनलेखनस्य सोपानानि प्रारूपञ्च प्रस्तूयताम्।

# SA-III/3/22SAS3CCTC3/23

## तृतीयसत्रार्द्धः

## तृतीयपत्रम्

## शैक्षिकप्रबन्धनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः - क

**केचन पञ्च प्रश्ना एव समाधेयाः।** **5 (प्रश्नः) ×5 (अङ्कः)=25**

1. शैक्षिकपर्यवेक्षणस्य का आवश्यकता?
2. शैक्षिकप्रबन्धनस्य सम्प्रत्ययं स्पष्टयत।
3. भारतीयगुणवत्तापरिषदः (QCI) उद्देश्यानि कानि?
4. नीति-आयोगः (NITI) कथं शैक्षिकप्रबन्धनेन सम्बद्धः?
5. नेतृत्वस्य सिद्धान्ताः के?
6. कस्याञ्चित् शैक्षिकसंस्थायां समन्वयं विधातुम् अवधेयांशाः के?
7. 1970 तः अधुना पर्यन्तं केन्द्रीयसंस्कृतविश्वविद्यालयस्य स्वरूपाणां विश्लेषणं कुरुत।

### खण्डः - ख

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) ×10 (अङ्कः)=20**

8. संस्थायाः दक्षतायां प्रभावशीलतायां च शेक्षिकप्रबन्धनं कथं सहायकम्? सोदाहरणं विवेचयत।
9. राष्ट्रिय-मूल्याङ्कन-प्रत्यायन-परिषदः (NAAC) परिचयं कार्याणि च लिखत।
10. संविधानस्य समवर्तिसूच्यां शिक्षायाः स्थितित्वेन शैक्षिकप्रशासने कः प्रभावः? उदाहरणमेकं लिखत।

### खण्डः - ग

**एकः प्रश्न एव समाधेयः।** **1 (प्रश्नः) ×15 (अङ्कः)=15**

11. उत्तमानां नेतृत्वगुणानां विकासे संस्कृतवाङ्मयं कथमुपकरोति? विशदीकुरुत।
12. भारतस्य केन्द्रीयविश्वविद्यालयानां प्रशासकसंस्थाः काः? कानि च तासां प्रकार्याणि?

# SA-III/4/22SAS3EDTC4A/23

## तृतीयसत्रार्द्धः

## चतुर्थपत्रम्

## तुलनात्मकशिक्षा

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन पञ्च प्रश्ना एव समाधेयाः।** **5 (प्रश्नाः) ×5 (अङ्काः)=25**

1. तुलनात्मकशिक्षायाः सम्प्रत्ययः कः?
2. तुलनात्मकशिक्षायाः ऐतिहासिकोपागमं वर्णयत।
3. तुलनात्मकशिक्षायाः वर्णनात्मकविधिं स्पष्टयत।
4. तुलनात्मकशिक्षायाः प्रभावोत्पादकाः घटकाः के?
5. तुलनात्मकशिक्षायाः आवश्यकतां प्रतिपादयत।
6. राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदि तुलनात्मकशिक्षायाः नवप्रवर्तनानि कानि?
7. वर्तमानपरिस्थितौ तुलनात्मकशिक्षायाः प्रासङ्गिकता का?

### खण्डः – ख

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नाः) ×10 (अङ्काः)=20**

8. शैक्षिकव्यवस्थायाः संवर्धने तुलनात्मकशिक्षायाः योगदानं विवृणुत।
9. तुलनात्मकशिक्षायाः विकासक्रमं स्पष्टयत।
10. तुलनात्मकशिक्षायाः समाजशास्त्रीयविधिं वर्णयत।

### खण्डः – ग

**एकः प्रश्न एव समाधेयः।** **1 (प्रश्नः) ×15 (अङ्काः)=15**

11. तुलनात्मकशिक्षायाः उद्देश्यानि विलिख्य उच्चशिक्षाक्षेत्रेषु तस्याः नवप्रवर्तनानि स्पष्टयत।
12. तुलनात्मकशिक्षायाः अध्ययनोपागमान् वर्णयत।

# SA-III/4/22SAS3EDTC4B/23

## तृतीयसत्रार्द्धः

## चतुर्थपत्रम्

## पर्यावरणसंरक्षणं तत्पुनरुद्धारश्च

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन पञ्च प्रश्ना एव समाधेयाः।** **5 (प्रश्नः) ×5 (अङ्कः)=25**

1. पर्यावरणप्रदूषणस्य निवारणे व्यक्तेः भूमिका कीदृशी स्यात्?
2. परम्परया जीववैविध्यस्य संरक्षणं कथं क्रियते?
3. पर्यावरणस्य अपकर्षेण जनानां स्वास्थ्यस्य उपरि कः प्रभावः भवति?
4. पर्यावरणस्य संरक्षणे समाजस्य भूमिका का?
5. पर्यावरणसंरक्षणस्य महत्त्वं प्रतिपादयत।
6. आदिवासीनां जीवनस्य उपरि निर्वनीकरणस्य कः प्रभावः भवति?
7. जैवकृषिः पर्यावरणस्य उपरि कीदृशं प्रभावं जनयति?

### खण्डः – ख

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) ×10 (अङ्कः)=20**

8. ऊर्जायाः वैकल्पिकस्रोतांसि कानि? विवृणुत।
9. बृहज्जैवविविधताराष्ट्रत्वेन भारतस्य स्वरूपं वर्णयत।
10. प्राकृतिकसंसाधनप्रबन्धने समुदायस्य सहभागिता कथं भवेदिति प्रतिपादयत।

### खण्डः – ग

**एकः प्रश्न एव समाधेयः।** **1 (प्रश्नः) ×15 (अङ्कः)=15**

11. अपशिष्टजननस्य प्रबन्धनं कथं कर्तव्यमिति सविस्तरं प्रतिपादयत।
12. पर्यावरणे मानवजनितापदां कः प्रभावः भवति? तन्नियन्त्रणञ्च कथं कर्तव्यमिति प्रतिपादयत।